याऽमपि "अथ इष्य होतरित्यथ इच्छ होतरित्येवेतदाह" शत०ब्रा० ३,६,२,१५। गतौ तुदादिरपि इषति निरु०।
अनु+अन्वेषणे गवेषणे "अन्विष्यन्नस्ततःसीताम्" रामा० "यावदेनामन्वेष्यामि" शकु०। "न रत्नमन्विष्यति मृग्यते हि तत्" कुमा०। "तस्यान्विष्यन् वेतसगूढं प्रभवं सः" रघुः। स्वार्थे णिच्। तत्रैव "राममन्वेषयामि" सा०द०।
प्र+प्रेरणे। "अप्रैषीद्राजपुत्री मां सुराहारीं तवान्तिकम्" भा०व०१६ अ०। "गत्वा प्रैषीच्च रावणम्" भट्टिः "अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति" आश्व०श्रौ०। "मौनः शेफं च प्रेष्यति" कात्या०१३,६,१। "अग्नीषोमाभ्यां छागस्य वपायै मेदसो प्रेष्य" शत० ब्रा० ३,८,२,२७। घञ् प्रैषः। ण्यत् प्रैषः। स्वार्थे णिच्। प्रेषयति प्रेषयामास। "स च मां प्रेषयामास" रामा०। [ षितः पर्य्येषणा। परि+सत्कारपूर्व्वकनियोजने पर्य्येष्यति स्वार्थे णिच् पर्य्ये-

इष वाञ्छायाम् तुदा०पर०सक०सेट् वेट् क्तः। १इच्छति, "इच्छामि संवर्द्धितमाज्ञया ते" कुमा०। इच्छेत् "यदीच्छेद्विपुलान् भोगान्" मल० त०पु०। "राजान्तेवासियाज्येभ्यः सीदद्भ्यो इच्छेद्धनं क्षुधा" या०स्मृ०। ऐच्छत् ऐषीत् "ऐषीः पुनर्जन्मजयाय यत्त्वम्" भट्टिः इयेष "इयेष सा कर्त्तुमवन्ध्यमात्मनः" कुमा० ईषतुः। इच्छन् "किमिच्छन् कस्य कामाय किमर्थमनुसंज्वरेत्" श्रुतिः।
एषिता—ऐष्टा एषित्वा—इष्ट्वा। भावे श इच्छा "आत्मजन्या भवेदिच्छा" न्यायका०। इष्टः "इष्टोऽसि मे सखा चेति" गीता। कर्मणि इष्यते "चिरात्सुतोच्छिद्यते" स्मृतिः। एष्टव्यः एषितव्यः। "एष्टव्या बहवः पुत्रायद्येकोऽपि गयां व्रजेत्" पु०।
अनु+अन्वेषणे। "तं खलन्तं इवान्वीषुः" शत०ब्रा०। "हन्त तमात्मानमन्विच्छामो यमन्वेष्टा" छा०उ०। "अनुपदमन्वेष्टा" पा० "वयं तत्त्वान्वेषात् मधुकर! हतास्त्वं खलु कृती" शकु०
प्रति+ प्रतिग्रहे प्रतीच्छति ( प्रतिगृह्णाति )। "ततः प्रतीच्छ प्रहरेति वादिनी" नैष० "स्नुषां प्रतीच्छ मे कन्याम्" प्राप्तौ च 'बुद्धौ शरणमन्विच्छ' गीता। स्वार्थे णिच् वेदे० नि० गुणाभावः। इषयति "इच्छन्तसदास्त रायेष मदन्त इषयेम ज्योतिः" ऋ०१,१८५,६। "इषयेम इच्छाम" भा०।
परि+अन्वेषणे च परीच्छति (अन्विष्यति) "भगवन्तं वा अहमेभिरार्त्विज्यैः पर्य्यैषिषम्" छा०उ०।
अभि+सम्यगिच्छायाम् अभीष्टम्।

इष आभीक्ष्ण्ये क्र्यादि० पौनःपुन्ये पर०अक० सेट्। इष्णाति इष्णातु इषाण। "इष्णन्निषाणामुं म इषाण सर्व्वलोकं म इषाण" यजु० ३१,२२,अ०। ऐष्णात् ऐषीत्। एषितः एषित्वा। प्रेरणे च। "भिनद्गिरिं शवसा वज्रमिष्णन्" ऋ० ४,१७,३। इष्णन् प्रेरयन्" भा०। इच्छार्थेऽपि "पूर्वीरिषश्चरति मध्व इष्णन्" ऋ० १,१८१,६। "मध्वः मधुनः इष्णन् इच्छन्" भा०। आभीक्ष्ण्यञ्च क्रियापौनःपुन्यम्। क्रिया च धात्वर्थविशेषः स च वाञ्छागत्यादिरेव तस्यैवाभीक्ष्ण्यद्योतनेऽस्य साधुत्वम्
इष गतौ भ्वा० उभ०सक० सेट्। एषति ते। ऐषीत् ऐषिष्ट अनु—अनुसरणे। अन्वेषति। "अन्वेषन्तीवनं राजन्" "देशमन्यं दुराचारमन्वैषन् वानरास्तथा" रामा०।
इष् त्रि० इष—इच्छायां क्विप्। १इच्छायुक्ते। इट्चरः। "विदाद्रूर्जं शतक्रतुं विदादिषम्" ऋ०२,१२,४। कर्मणि क्विप्। २इष्यमाणे त्रि०३अन्ने स्त्री "मधुमतीने इषस्कृधि" यजु० ७,२, "आश्विनायज्वरीरिषः १,३,१। "इषे त्वोर्ज्जे त्वा" यजु० १,१,। इष्यतेइष—अन्तर्भूतण्यर्थे कर्मणि क्विप्। ४एषणीये। "इषस्तुतो मन्हामहे" ऋ० ५,५०,५, "इषः एषणीयस्य" भा०। इष—गतौ भावे क्विप्। ५यात्रायाम् स्त्री
इष पु० इष—गतौ क्विप्—इट् यात्रा शास्त्रिन् मासे जिगीषूणामस्ति अर्श आ०अच्। सौरे चान्द्रे च आश्विने १मासि। "आवश्ये भाद्रमासे युवतिगृहगते चार्थलाभः प्रदिष्टः" राजमा०उक्तेः "सौराश्विनस्य यात्रायाम् अर्थलाभदत्वात्तथात्वम्"। अत एव रघौ "सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान्। यात्रायै नोदयामास तं शक्तेः प्रथमं शरत्"। शरत्कालस्य राज्ञां यात्रार्थत्वमुक्तम्। शरदृतुश्च "इषश्चोर्जश्च शरदिति" श्रुत्युक्तः आश्विनकार्त्तिकमासरूपःकालः तस्य च सौरत्वस्मृतशब्दे वक्ष्यते "आमेखलं सञ्चरतां घनानां छायामधः सानुगतां निषेव्य" कुमा०पाठान्तरम्। "ध्वनिमिषेऽनिषेच्चणमद्युत्" माघः। तत्र चान्द्रे "इषे मास्यसिते गक्षे नवम्यामार्द्रयोगतः" तिथि० देवीपु०अत चान्द्रोगौणः "यच्छरदूर्जस्य औषधः पच्यन्ते तेनोहैताविषश्चोर्जश्च" शत० ब्रा० ऋ०४,३,१,१७, 'अन्तर्भूतण्यर्थे भावे घञर्थे क'। २प्रेषणे "इषवान् मम रेजति" ऋ०१,२६,६, "इषवान् प्रेषणवान्" भा०। इष—इच्छायां कर्मणि घञर्थे क ३अन्ने न०निरु०।
इषणि स्त्री इष—भावे अनि वेदे०नि० गुणाभावः। प्रेषणे